International Journal of Applied Research 2023; 9(6): 197-201




**ISSN Print:** 2394-7500
**ISSN Online:** 2394-5869
**Impact Factor:** 8.4
IJAR 2023; 9(6): 197-201
www.allresearchjournal.com
Received: 09-03-2023
Accepted: 12-05-2023

**डॉ. रामायण सिंह**
सहायक आचार्यः
विश्वविद्यालय संस्कृत विभागः
तिलकामाँझी भागलपुर
विश्वविद्यालयः, बिहार, भारत

**Corresponding Author:**
**डॉ. रामायण सिंह**
सहायक आचार्यः
विश्वविद्यालय संस्कृत विभागः
तिलकामाँझी भागलपुर
विश्वविद्यालयः, बिहार, भारत

# संस्कृतसाहित्येषु पर्यावरणपरीक्षणस्यानुशीलनम्

**डॉ. रामायण सिंह**

**सारांश**

निखिलविश्वे यज्ज्ञानं वर्त्तते तत्सर्वं संस्कृतसाहित्ये उल्लिखितम्। पर्यावरणस्यात्यधिकं महत्त्वं वर्त्तते मानवजीवने। पर्यावरणं प्रकृतेः स्वरूपम्। विषयास्यान्वेषणमपि आवेदादाधुनिकसाहित्यपर्यन्तं क्रियते विद्वद्भिः। संस्कृतसाहित्येषु पर्यावरणपरीक्षणस्यानुशीलनमुपस्थापितमस्मिन् शोधपत्रे —

**कूटशब्दाः** पर्यावरणम्, प्रकृतिः, भूमिः, जलम्, नभः, वायुः, वृक्षाः, प्रदूषणम्, जीवाः

## प्रस्तावना

किन्नाम पर्यावरणम् ? 'परि' तथा 'आङ्' पूर्वकाभ्याम् उपसर्गाभ्याम् 'वृतु वर्तने' धातोः ल्युट्-प्रत्यये कृते सति 'पर्यावरणमि'ति पदं सिद्धं भवति। पर्यावरणस्य व्युत्पत्त्यात्मकोऽर्थोऽस्ति — "येन वयमावृताः स्मः किंवा यदस्मान् आवृणोतीति"। परिभाष्यते पदमिदमन्यच्च संस्त्यायरूपेण —

भूमिर्जलं नभो वायुरन्तरिक्षं पशुस्तृणम्।
साम्यं स्वस्थत्वमेतेषां पर्यावरणसञ्ज्ञकम्॥

विश्वविख्यातपर्यावरणविद् हर्सकोवित्समहोदयः कथयति यदखिलपरिस्थितिषु प्राणिषु चानुभूताः प्रभावाः पर्यावरणं विद्यते ये जैवजगतः विकासचक्रस्य नियामकाः सन्ति। वैश्विकविश्वकोषानुसारं पर्यावरणस्यान्तर्गते सर्वाणि सङ्घटनानि समुच्चयरूपाणि विद्यन्ते ये कस्यचित् जीवस्योद्भवं विकासं मृत्युञ्च प्रत्यक्षाप्रत्यक्षत्वेन प्रभावितं कुर्वन्ति।

भारतीयसंविधानस्य नीतिनिर्देशकतत्त्वस्य अष्टचत्वारिंशत् 'क' एतस्मिन् अनुच्छेदे प्रावधानमिदं विद्यते यत् देशस्य पर्यावरणसंरक्षणार्थं वनानां वन्यजीवानाञ्च रक्षणाय राज्येन प्रयासः करिष्यते। अस्मिन्नेव क्रमे मौलिककर्त्तव्यरूपेण स्थितम् एकपञ्चाशत् 'क' इत्यस्मिन् अनुच्छेदे विहितमस्ति यद्भारतीयानां नागरिकानां महनीयं कर्त्तव्यमिदं भविष्यति यद् वनानां वन्यजीवानाञ्च संरक्षणं तैः

करणीयं सजीवप्राणिनां प्रति कारुण्यं प्रदर्शनीयञ्चेति।

**विषयावतरणम्:** सम्प्रति सकलभुवनान्तर्गते यदा प्रकृतिः असन्तुलिता सञ्जाता तदा पर्यावरणसंरक्षणविषये पशुपक्षिणोः रक्षणविषये च चर्चा क्रियमाणा भवति। कथं सर्वाणि प्रदूषणानि निराकरणानि ? मनुष्याः शुद्धं जलं वायुञ्च कथं लभेयुः इति प्रश्नोऽयं पौनः पुन्येन सर्वजनान् आन्दोलयति। अस्मच्छरीराण्यपि पृथिव्यप्तेजोवाय्वाकाशैः पञ्चमहाभूतैरेव विरचितानि। एतदर्थम् एतानि पञ्चतत्त्वानि स्वस्थसुरक्षितानि कर्त्तुम् एतेषां तत्त्वानां शुद्धता पवित्रता च सर्वथाऽपेक्षिता भवत्येव।

**विषयवस्तु:** भारतीयैः ऋषिभिः मनीषिभिः कविभिः पूर्वाचार्यैश्च एतत् तथ्यं मनसि निधाय प्रकृतेः विभिन्नैः प्रकारैः स्वकीयेषु ग्रन्थेषु उद्घाटितम्। संसारस्य प्राचीनतमाः ग्रन्थाः वेदाः सन्ति। तेषु ग्रन्थेषु प्रकृतेः सर्वाणि उपकरणानि देवरूपाणि प्रकल्पितानि। सवितृदेवः अष्टौ दिशः प्रकाशितवान् सप्तसमुद्रांश्च दृष्टवान् —

अष्टौ व्यख्यत्ककुभः पृथिव्यास्त्रिधन्व योजना सप्तसिन्धून्।[1]

देवस्यास्य मार्गाः धूलिरहिताः विद्यन्ते —

ये ते पन्थाः सवितः पूर्व्यासोऽरेणवः सुकृता अन्तरिक्षे।[2]

पर्जन्यः मेघस्य वर्षायाः देवतास्ति। जलदः धरां जलेन रक्षति तदा सर्वेभ्यः अन्नं भवति —

इरा विश्वस्मै भुवनाय जायते

यत्पर्जन्यः पृथिवीं रेतसावति।[3]

अस्य देवस्यादेशत्वेन ओषधयः नानारूपाः भवन्ति —

यस्य व्रत ओषधिर्विश्वरूपाः स नः पर्जन्य महि शर्म यच्छ॥[4]

यजुर्वेदस्य षोडशेऽध्याये (रुद्राध्याये) रुद्रः वृक्ष-वनौषधित्वेन दृश्यते —

वृक्षाणां पतये नमः।

वनानां पतये नमः।

ओषधीनां पतये नमः।[5]

शतपथब्राह्मणे शिवः ओषधिरूपेण स्तूयते —

ओषधो वै पशुपतिः।[6]

ऋग्वेदे ओजोनस्तरार्थं 'महत् उल्ब' इति पदं व्यवहृतम्। अथर्ववेदेऽपि वर्णनमस्य हिरण्यत्वेन दरीदृश्यते। तद्यथा —

(क) महत् तदुल्बं स्थविरं

येनाविष्टितः प्रविवेशिथापः।[7]

(ख) तस्योत जायमानस्य उल्ब आसीद् हिरण्ययः।[8]

अवितत्त्वेन वृक्षेषु हरीतिमा दृश्यते इति अथर्ववेदः प्रतिपादयति—

अविर्वै नाम देवता ऋतेनास्ते परीवृता।

तस्या रूपेणेमे वृक्षा हरिता हरितस्रजः॥[9]

वृक्षेषु ब्रह्मणः सत्ता विद्यते येन वनस्पतयः जीवन्ति। वृक्षाः ऊर्ध्वं शेरते —

(क) महद् ब्रह्म . . . येन प्राणन्ति वीरुहः।[10]

(ख) अस्थुर्वृक्षा ऊर्ध्वस्वप्नाः।[11]

वृक्षाः संरक्षणीयाः येन जलस्य उत्सस्य रक्षां स्यादिति बाहवृच्ये उपस्थापितमस्ति —

वनस्पतिं वन आस्थापयध्वं

नि षू दधिध्वम् अखनन्त उत्सम्।[12]

यजुर्वेदे कथितमस्ति यदुदकं न प्रदूषणीयम्। वनस्पतिं वर्धस्व।

(क) माऽपो हिंसी। मा ओषधी हिंसीः।[13]

(ख) अपः पिन्व, ओषधिर्जिन्व।[14]

ऋग्वेदस्य कथनमस्ति यद् वायुमण्डलस्य वायुतत्त्वं पीयूषगेहरूपं विद्यते। अथर्ववेदेऽपि कथितमस्ति यद् वायुः विश्वभेषजः' अस्ति —

(क) यदहो वात ते गृहे अमृतस्य निधिर्हितः।

तेन नो देहि जीवसे।[15]

(ख) वात . . . त्वं हि विश्वभेषज।[16]

यजुर्वेदः आदिशति यद् द्यु-भू-अन्तरिक्षान् क्षितिं न प्रापयेत् —

(क) पृथिवीं दृंह, पृथिवीं मा हिंसीः।

(ख) अन्तरिक्षं दृंह, अन्तरिक्षं मा हिंसीः।

(ग) दिवं दृंह, दिवं मा हिंसीः।[17]

अथर्ववेदे पर्यावरणस्य त्रयः सङ्घटकाः वर्णिताः — जलम्-वायुः-ओषधिश्च। अस्माकं पृथिवी एतैः कारकैः आवृत्ता अस्ति।

त्रीणि छन्दांसि कवयो वि येतिरे,
पुरुरूपं दर्शनं विश्वचक्षणम्।
आपो वाताः ओषधयः
तान्येकस्मिन् भुवन अर्पितानि॥[18]

वैदिकसाहित्यादतिरिच्य संस्कृतसाहित्यस्य अन्यविधास्वपि पर्यावरणसंरक्षणार्थाः विविधाःउपायाः विहिताः सन्ति।

2600 तमवर्षपूर्वतनस्य मौर्यकालीनस्य बृहच्छिलालेखस्यानुसन्धानेन ज्ञायते यन्मौर्यसम्राजा अशोकेन ईशोः जन्मनः पूर्वं तृतीयशताब्द्यां तात्कालिकीमावश्यकतामनुभूय पर्यावरण-संरक्षणविषयिणी राजाज्ञा दत्ता आसीत्। साज्ञा निखिलविश्वस्य सर्वप्रथमा लिखिता पर्यावरणरक्षणस्य आज्ञासीत्। एकं वृक्षमपि राजाज्ञां विना छेत्तुं न कोऽपि शक्यते स्म। प्रायशः तादृशस्य कठोरस्य विनियमस्य कारणादेव इदानीम् अस्माभिः पशु-वनस्पत्योः बह्वीः विरलाः संवर्गाः दृश्यन्ते।

अशोकमौर्यस्य राजाज्ञा चतुर्दशभागेषु विभक्ता बृहच्छिलालेखेषु दृश्यते। एतेषु चतुर्दशभागेषु निसर्गसंरक्षणविषयक-नियमाः समाजस्य सर्वाङ्गीणविकासार्थमासन्। पशूनां चिकित्सार्थं कष्टलभ्यानां वनस्पतीनां आयातञ्च स्वकीयया द्वितीयया राजाज्ञया अशोकमौर्यः आदिशति। अशोकचक्रवर्त्तिना कृतास्व-परासु आज्ञासु जलचराणां रक्षणं संरक्षितगजवनानामुल्लेखः प्राप्यते। कौटिल्यकृत-अर्थशास्त्रेऽपि गजानां रक्षणार्थं वनानां पोषणार्थञ्च 'नागवनाध्यक्षः' इत्यभिधायुक्तः अधिकारी नियुक्तः भवति स्म। विवीताध्यक्षत्वेन सर्वत्र हरीतिमा प्रसरति च।

संस्कृतकाव्यनिर्माणार्थं निसर्गवर्णनमावश्यकतत्त्वं विद्यते। महाकाव्यलक्षणानुसारं सूर्योदय-चन्द्रोदय-सन्ध्या-सागर-ऋतु-सरोवर-वन-उद्यानानामुपादानानाञ्चित्रणमपरिहार्यं भवति। फलतः वर्णनमिदमप्रत्यक्षत्वेन पर्यावरणसंरक्षणं प्रति प्रेरयति मानवान्। आदिकविना वाल्मीकिना वर्षावर्णनक्रमे कथ्यते —

क्वचित्प्रकाशं क्वचिदप्रकाशं नभः प्रकीर्णाम्बुधरं विभाति।
क्वचित्-क्वचित् पर्वतसन्निरुद्धं रूपं यथा शान्तमहार्णवस्य॥[19]

अपि च —

वहन्ति वर्षन्ति नदन्ति भान्ति
ध्यायन्ति नृत्यन्ति समाश्वसन्ति।
नभो घना मत्तगजा वनान्ताः
प्रियाविहीनाः शिखिनः प्लवङ्गाः॥[20]

श्रीमद्भागवते श्रीकृष्णःवृन्दावने बलरामं प्रति पर्यावरणप्रधानभूतवृक्षादीनां महत्त्वं प्रतिपादयन् कथयति —

पश्यैतान् महाभागान् परार्थैकान्तजीवितान्।
वात-वर्षातप-हिमान् सहन्तो वारयन्तिनः॥
पत्र-पुष्प-फल-च्छाया-मूल-वल्कल-दारुभिः।[21]

कविकुलगुरुणा कालिदासेन शिशिरर्तुवर्णनक्रमे ऋतुसंहारे परिकल्प्यते —

न चन्दनं चन्द्रमरीचिशीतलं
न हर्म्यपृष्ठं शरदिन्दुनिर्मलम्।
न वायवः सान्द्रतुषारशीतला
जनस्य चित्तं रमयन्ति साम्प्रतम्॥[22]

मेघपर्वतयोः मेलनं बहुकालादनन्तरं भवति। एतच्चित्रयति कालिदासेन मेघदूते —

काले-काले भवति भवतो यस्य संयोगमेत्य
स्नेहव्यक्तिश्चिरविरहजं मुञ्चतो वाष्पमुष्णम्॥[23]

दशार्णदेशस्य चमत्कारकारिवर्णनं प्रस्तौति कालिदासः —

पाण्डुच्छायोपवनवृतयः केतकैः सूचिभिन्नै-
नीडारम्भैर्गृहबलिभुजामाकुलग्रामचैत्याः।
त्वय्यासन्ने परिणतफलश्यामजम्बूवनान्ताः
सम्पत्स्यन्ते कतिपयदिनस्थायिहंसा दशार्णाः॥[24]

महाकविकालिदासविरचित-अभिज्ञानशाकुन्तले शकुन्तला-पतिगृहप्रस्थानकाले वनस्पतिभिः वनदेवतया च सर्वाणि अलङ्कारवस्तूनि शकुन्तलार्थं प्रदत्तानि —

क्षौमं केनचिदिन्दुपाण्डु तरुणा माङ्गल्यमाविष्कृतम्
निष्ठ्यूतश्चरणोपभोगसुलभो लाक्षारसः केनचित्।
अन्येभ्यो वनदेवताकरतलैरापर्वभागोत्थितै
र्दत्तान्याभरणानि तत्किसलयोद्भेदप्रतिद्वन्द्विभिः॥[25]

शकुन्तलाप्रस्थानसमये तस्याः वियोगेन विह्वलानां पशुपक्षिलतादीनां कीदृशी व्यथास्ति इति वर्णयति महाकविः—

उद्गलितदर्भकवला मृग्यः परित्यक्तनर्तनाः मयूराः।
अपसृतपाण्डुपत्रा मुञ्चन्त्यश्रूणीव लताः॥[26]

शकुन्तलायाः वानस्पतिकसम्बन्धः कीदृशः आसीदिति उपस्थाप्यतेऽत्र —

पातुं न प्रथमं व्यवस्यति जलं युष्माष्वपीतेषु या
नाधत्ते प्रियमण्डनापि कुसुमं स्नेहेन या पल्लवम्।
आद्ये वः कुसुमप्रसूतिसमये यस्याः भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्॥[27]

अनेनेव कारणेन शकुन्तलापतिगृहप्रस्थानवेलायां शिवात्मिकावाणी गगने प्रस्फुटिता भवति —

रम्यान्तरः कमलिनीहरितैः सरोभि-
श्छायाद्रुमैर्नियमितार्कमयूरवातपः।
भूयात् कुशेशयरजो मृदुरेणुरस्याः
शान्तानुकूलपवनश्च शिवश्च पन्थाः॥[28]

एवं वैदिककालादरभ्य अद्यावधिं विभिन्नकालखण्डेषु रचितेषु संस्कृतसाहित्येषु प्रत्यक्षाप्रत्यक्षत्वेन बहुविधं वर्णितमस्ति पर्यावरणसंरक्षणोपायम्। अद्यत्वे तु यत्र तत्र सर्वत्र पर्यावरणप्रदूषणस्य वैविध्यं दरीदृश्यते। अनेकाः संस्थाः वायु-जल-ध्वनि-मृदा-नाभिकीयजन्यानां प्रदूषणानां निराकर्त्तुं सदैव क्रियमाणाः सन्ति। सन्दर्भेऽस्मिन् मानवपर्यावरणसम्मेलनम् स्टॉकहोमे (1972), ओजोनस्तररक्षणार्थं वियेनासम्मेलनम् (1985), विश्वपृथिवीसम्मेलनम् रियो दि जेनेरियो-नगरे (1992), क्योटोसम्मेलनम् (1997), जोहान्सबर्गसम्मेलनम् (2002), कोपेनहेगेनसम्मेलनम् (2009) च उल्लेखनीयानि सन्ति। जनसाधारणस्य कार्येऽस्मिन् जागरुकता अति महत्त्वपूर्णा अस्ति।

उपसंक्षेपः — संस्कृतसाहित्यस्य सूक्ष्मेक्षिकया गवेषणेन ज्ञायते यत् तदानींतनाः जनाः कवयश्च पर्यावरणसंरक्षणं प्रति अविहतचेतांसि आसन्। एवं कथयितुं शक्यते यत् पर्यावरणसंरक्षणे यावन्नितरां जनसहभागिता न प्राप्यते तावत् सर्वकारस्य नाना प्रयत्नाः न सुतरां साफल्यं गमिष्यन्तीति निश्चप्रचम्।

## सन्दर्भ


1. ऋग्वेदः 1.35.8
2. तत्रैव; 1.35.11
3. तत्रैव; 5.83.4
4. तत्रैव; 5.83.5

5. यजुर्वेदः 16.19
6. शतपथब्राह्मणम् 6.1.3.12
7. ऋग्वेदः 10.51.1
8. अथर्ववेदः 4.2.8
9. तत्रैव; 10.8.31
10. तत्रैव; 1.32.9
11. तत्रैव; 6.44.1
12. ऋग्वेदः 10.101.11
13. यजुर्वेदः 6.22
14. तत्रैव; 14.8
15. ऋग्वेदः 10.186.3
16. अथर्ववेदः 4.13.3
17. यजुर्वेदः 15.64
18. अथर्ववेदः 18.1.17
19. रामायणम् 4.28.17
20. तत्रैव; 4.28.27
21. भागवतम् 10.22.32
22. ऋतुसंहारम् 5.3
23. मेघदूतम् 1.12
24. तत्रैव; 1.25
25. अभिज्ञानशाकुन्तलम् 4.4
26. तत्रैव; 4.12
27. तत्रैव; 4.9
28. तत्रैव; 4.11